# Shri Mangala Ashtakam

# શ્રીમઙ્ગલાષ્ટકમ્

## Document Information

Text title : Shri Mangala Ashtakam 08 31

File name : mangalAShTakam.itx

Category : devii, devI, mangala, aShTaka

Location : doc_devii

Proofread by : Rajesh Thyagarajan

Description/comments : From stotrArNavaH 08-31

Latest update : August 15, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 15, 2021

*sanskritdocuments.org*

# Shri Mangala Ashtakam

# શ્રીમઙ્ગલાષ્ટકમ્

બ્રહ્મા વિષ્ણુર્ગિરીશઃ સુરપતિરનલઃ પ્રેતરાડ્યાતુનાથઃ
   તોયાધીશશ્ચ વાયુર્ધનદગુહગણેશાર્કચન્દ્રાશ્ચ રુદ્રાઃ ।
વિશ્વાદિત્યાશ્વિસાધ્યા વસુપિતૃમરુતઃ સિદ્ધવિદ્યાધ્રયક્ષાઃ
   ગન્ધર્વાઃ કિન્નરાશ્ચાખિલગગનચરાઃ મઙ્ગલં મે દિશન્તુ ॥ ૧॥

વાણી લક્ષ્મીર્ધરિત્રી હિમગિરિતનયા ચણ્ડિકા ભદ્રકાલી
   બ્રાહ્મ્યાદ્યા માતૃસઙ્ઘા આદતિદિતિસતીત્યાદયો દક્ષપુત્ર્યઃ ।
સાવિત્રી જહ્નુકન્યા દિનકરતનયારુન્ધતી દેવપત્ન્યઃ
   પૌલોમ્યાદ્યાસ્તથાન્યાઃ ખચરયુવતયો મઙ્ગલં મે દિશન્તુ ॥ ૨॥

મત્સ્યઃ કૂર્મો વરાહો નૃહરિરથ વટુર્ભાર્ગવો રામચન્દ્રઃ
   સીરી કૃષ્ણશ્ચ કલ્કી સ કપિલનરનારાયણોઽત્રેયવૈન્યઃ ।
અન્યે નાનાવતારા નરકવિજયિનશ્ચક્રમુખ્યાયુધાનિ
   તત્પત્ન્યઃ તત્સુતાશ્ચાપ્યખિલહરિકલા મઙ્ગલં મે દિશન્તુ ॥ ૩॥

વિશ્વામિત્રો વસિષ્ઠઃ કલાભવ ઉચથ્યોઽઙ્ગિરાઃ કાશ્યપશ્ચ
   વ્યાસઃ કણ્વો મરીચિઃ ક્રતુભૃગુપુલહો ગૌતમોઽત્રિઃ પુલસ્ત્યઃ ।
અન્યે સર્વે મુનોન્દ્રાઃ કુજબુધગુરુશુક્રાર્કજાદ્યા ગ્રહા યે
   નક્ષત્રાણિ પ્રદેશાઃ ફણિગણમનવો મઙ્ગલં મે દિશન્તુ ॥ ૪॥

તાર્ક્ષ્યોઽનન્તો હનૂમાન્ બલિરપિ સનકાદ્યાઃ શુકો નારદશ્ચ-
   પ્રહ્લાદઃ પાણ્ડુપુત્રો નૃગનલનહુષા વિષ્ણુરાતોઽમ્બરીષઃ ।
ભીષ્મોઽક્રૂરોદ્ધવોશીનરભરતહરિશ્ચન્દ્રરુક્માઙ્ગદાદ્યાઃ
   અન્યે સર્વે નરેન્દ્રાઃ રવિશશિકુલજાઃ મઙ્ગલં મે દિશન્તુ ॥ ૫॥

આકૂત્યાદ્યાશ્ચ તિસ્રઃ સકલમુનિકલત્રાણિ દારા મનૂનાં
   સીતા કુન્તી ચ પાઞ્ચાલ્યથ નલદયિતા રુક્મિણી સત્યભામા ।
દેવક્યાદ્યાશ્ચ સર્વા યદુકુલવનિતા રાજભાર્યાસ્તથાન્યાઃ
   ગોપ્યશ્ચારિત્રયુક્તાઃ સકલયુક્તયો મઙ્ગલં યે દિશન્તુ ॥ ૬॥

વિપ્રા ગાવશ્ચ વેદાઃ સ્મૃતિરપિ તુલસી પુણ્યતીર્થાનિ વિદ્યા
નાનાશાસ્ત્રેતિહાસાન્યપિ સકલપુરાણાનિ વર્ણાશ્રમાશ્ચ ।
સાઙ્ખ્યજ્ઞાનઞ્ચ યોગા અપિ યમનિયમૌ સર્વકર્માણિ કાલાઃ
સર્વે ધર્માશ્ચ સત્યાદ્યવયવસહિતા મઙ્ગલં મે દિશન્તુ ॥ ૭॥

લોકા જીવાઃ સમુદ્રાઃ ક્ષિતિધરપતયો મેરુકૈલાસમુખ્યાઃ
કાવેરીનર્મદાદ્યાઃ શુભજલસહિતાઃ સ્વર્દ્રુમા દિગ્ગજેન્દ્રાઃ ।
મેઘા જ્યોતીંષિ નાનાનરપશુમૃગપક્ષ્યાદયઃ પ્રાણિનોઽન્યે
સર્વૌષધ્યશ્ચ વૃક્ષાઃ સકલતૃણલતા મઙ્ગલં મે દિશન્તુ ॥ ૮॥

ભક્ત્યા સંયુક્તચિત્તાઃ પ્રતિદિવસમિમાન્મઙ્ગલસ્તોત્રમુખ્યા-
નષ્ટૌ શ્લોકાન્ પ્રભાતે દિવસપરિણતૌ યે ચ મર્ત્યાઃ પઠન્તિ ।
તે નિત્યં પૂર્ણકામા ઇહ ભુવિ સુખિનશ્ચાર્થવન્તોઽપિ ભૂત્વા
નિર્મુક્તાઃ સર્વપાપૈર્વયસિ ચ ચરમે વિષ્ણુલોકં પ્રયાન્તિ ॥ ૯॥

ઇતિ શ્રીમઙ્ગલાષ્ટકં સમ્પૂર્ણમ્ ।

Proofread by Rajesh Thyagarajan

*Shri Mangala Ashtakam*

pdf was typeset on August 15, 2021

Please send corrections to *sanskrit@cheerful.com*